# ॥ वाल्मीकि रामायण॥

## ५ सुन्दरकाण्ड

### अध्याय ३

स लम्बशिखरे लम्बे लम्बतोयदसंनिभे ।
सत्त्वमास्थाय मेधावी हनुमान्मारुतात्मजः ॥ १॥

निशि लङ्कां महासत्त्वो विवेश कपिकुञ्जरः ।
रम्यकाननतोयाढ्यां पुरीं रावणपालिताम् ॥ २॥

शारदाम्बुधरप्रख्यैर्भवनैरुपशोभिताम् ।
सागरोपमनिर्घोषां सागरानिलसेविताम् ॥ ३॥

सुपुष्टबलसङ्गुप्तां यथैव विटपावतीम् ।
चारुतोरणनिर्यूहां पाण्डुरद्वारतोरणाम् ॥ ४॥

भुजगाचरितां गुप्तां शुभां भोगवतीम् इव ।
तां सविद्युद्घनाकीर्णां ज्योतिर्मार्गनिषेविताम् ॥ ५॥

चण्डमारुतनिर्ह्रादां यथेन्द्रस्यामरावतीम् ।
शातकुम्भेन महता प्राकारेणाभिसंवृताम् ॥ ६॥

किङ्किणीजालघोषाभिः पताकाभिरलङ्कृताम् ।
आसाद्य सहसा हृष्टः प्राकारमभिपेदिवान् ॥ ७॥

विस्मयाविष्टहृदयः पुरीमालोक्य सर्वतः ।
जाम्बूनदमयैर्द्वारैर्वैदूर्यकृतवेदिकैः ॥ ८॥

मणिस्फटिक मुक्ताभिर्मणिकुट्टिमभूषितैः ।
तप्तहाटकनिर्यूहै राजतामलपाण्डुरैः ॥ ९॥

वैदूर्यतलसोपानैः स्फाटिकान्तरपांसुभिः ।
चारुसञ्जवनोपेतैः खमिवोत्पतितैः शुभैः ॥ १०॥

क्रौञ्चबर्हिणसङ्घुष्टे राजहंसनिषेवितैः ।
तूर्याभरणनिर्घोषैः सर्वतः प्रतिनादिताम् ॥ ११॥

वस्वोकसाराप्रतिमां समीक्ष्य नगरीं ततः ।
खमिवोत्पतितां लङ्कां जहर्ष हनुमान्कपिः ॥ १२॥

तां समीक्ष्य पुरीं लङ्कां राक्षसाधिपतेः शुभाम् ।
अनुत्तमामृद्धियुतां चिन्तयामास वीर्यवान् ॥ १३॥

नेयमन्येन नगरी शक्या धर्षयितुं बलात् ।
रक्षिता रावणबलैरुद्यतायुधधारिभिः ॥ १४॥

कुमुदाङ्गदयोर्वापि सुषेणस्य महाकपेः ।
प्रसिद्धेयं भवेद्भूमिर्मैन्दद्विविदयोरपि ॥ १५॥

विवस्वतस्तनूजस्य हरेश्च कुशपर्वणः ।
ऋक्षस्य केतुमालस्य मम चैव गतिर्भवेत् ॥ १६॥

समीक्ष्य तु महाबाहो राघवस्य पराक्रमम् ।
लक्ष्मणस्य च विक्रान्तमभवत्प्रीतिमान्कपिः ॥ १७॥

तां रत्नवसनोपेतां कोष्ठागारावतंसकाम् ।
यन्त्रागारस्तनीमृद्धां प्रमदामिव भूषिताम् ॥ १८॥

तां नष्टतिमिरां दीपैर्भास्वरैश्च महागृहैः ।
नगरीं राक्षसेन्द्रस्य ददर्श स महाकपिः ॥ १९॥

प्रविष्टः सत्त्वसम्पन्नो निशायां मारुतात्मजः ।
स महापथमास्थाय मुक्तापुष्पविराजितम् ॥ २०॥

हसितोद्घुष्टनिनदैस्तूर्यघोष पुरः सरैः ।
वज्राङ्कुशनिकाशैश्च वज्रजालविभूषितैः ।
गृहमेधैः पुरी रम्या बभासे द्यौरिवाम्बुदैः ॥ २१॥

प्रजज्वाल तदा लङ्का रक्षोगणगृहैः शुभैः ।
सिताभ्रसदृशैश्चित्रैः पद्मस्वस्तिकसंस्थितैः ।
वर्धमानगृहैश्चापि सर्वतः सुविभाषितैः ॥ २२॥

तां चित्रमाल्याभरणां कपिराजहितङ्करः ।
राघवार्थं चरञ्श्रीमान्ददर्श च ननन्द च ॥ २३॥

शुश्राव मधुरं गीतं त्रिस्थानस्वरभूषितम् ।
स्त्रीणां मदसमृद्धानां दिवि चाप्सरसाम् इव ॥ २४॥

शुश्राव काञ्चीनिनादं नूपुराणां च निःस्वनम् ।
सोपाननिनदांश्चैव भवनेषु महात्मनम् ।

आस्फोटितनिनादांश्च क्ष्वेडितांश्च ततस्ततः ॥ २५॥

स्वाध्याय निरतांश्चैव यातुधानान्ददर्श सः ।
रावणस्तवसंयुक्तान्गर्जतो राक्षसानपि ॥ २६॥

राजमार्गं समावृत्य स्थितं रक्षोबलं महत् ।
ददर्श मध्यमे गुल्मे राक्षसस्य चरान्बहून् ॥ २७॥

दीक्षिताञ्जटिलान्मुण्डान्गोऽजिनाम्बरवाससः ।
दर्भमुष्टिप्रहरणानग्निकुण्डायुधांस्तथा ॥ २८॥

कूटमुद्गरपाणींश्च दण्डायुधधरानपि ।
एकाक्षानेककर्णांश्च चलल्लम्बपयोधरान् ॥ २९॥

करालान्भुग्नवक्त्रांश्च विकटान्वामनांस्तथा ।
धन्विनः खड्गिनश्चैव शतघ्नी मुसलायुधान् ।
परिघोत्तमहस्तांश्च विचित्रकवचोज्ज्वलान् ॥ ३०॥

नातिष्ठूलान्नातिकृशान्नातिदीर्घातिह्रस्वकान् ।
विरूपान्बहुरूपांश्च सुरूपांश्च सुवर्चसः ॥ ३१॥

शक्तिवृक्षायुधांश्चैव पट्टिशाशनिधारिणः ।
क्षेपणीपाशहस्तांश्च ददर्श स महाकपिः ॥ ३२॥

स्रग्विणस्त्वनुलिप्तांश्च वराभरणभूषितान् ।
तीक्ष्णशूलधरांश्चैव वज्रिणश्च महाबलान् ॥ ३३॥

शतसाहस्रमव्यग्रमारक्षं मध्यमं कपिः ।
प्राकारावृतमत्यन्तं ददर्श स महाकपिः ॥ ३४॥

त्रिविष्टपनिभं दिव्यं दिव्यनादविनादितम् ।
वाजिहेषितसङ्घुष्टं नादितं भूषणैस्तथा ॥ ३५॥

रथैर्यानैर्विमानैश्च तथा गजहयैः शुभैः ।
वारणैश्च चतुर्दन्तैः श्वेताभ्रनिचयोपमैः ॥ ३६॥

भूषितं रुचिरद्वारं मत्तैश्च मृगपक्षिभिः ।
राक्षसाधिपतेर्गुप्तमाविवेश गृहं कपिः ॥ ३७॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com